CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जुलाई २००४ ईसवीयाब्दः ओ३म् R.N.I. Regd. No. UPBIL / 1998 / 1485

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

'भारते भातु भारती'

☆ प्रीतिवीथी गभीरा-गभीरा !! ☆

- मिश्रोऽभिराज-राजेन्द्रः-
कुलपतिः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयः
वाराणसी २२१००२ (उ.प्र.)

(१)

सुगम्याः परे जीवने सन्तु मार्गाः
परं प्रीतिवीथी गभीरा-गभीरा !!

(२)

युयोजाऽञ्जनं कीदृशं नेत्रयोः सा
अपश्यन्मुकुन्दं स्फुटं येन मीरा !!

(३)

अवाप्तेऽपि कौमारभिद्येव कान्ते
कथं स्मर्यते नर्मदा कुञ्जतीरा ।।

(४)

प्रयोज्या सदा प्रीतिगर्भैव वाणी
गिरं सूनृतां धेनुमाहुर्हि धीराः ।।

(५)

चिरं वर्धतामाम्रवाटी धरायां
वृथाजन्मिनो हन्त कुटजाः करीरा ।।

(६)

सरिन्नित्यशुष्का, तया को नु लाभः ?
जयेद् वापिका हंसरम्या सनीरा ।।

(७)

शनैरुच्यतां, कर्णिनी भित्तिरेषा
बका वैरिणोऽत्र प्रणिधयश्च कीराः ।।

(८)

न यो हिन्दुपक्षे न वा तुर्कपक्षे
स निश्चप्रचं सत्य-वक्ता कबीरा ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूरभाष - ०१३३४ २५४२९५ २५५३७७ (ज्वालापुरम्) तारगृहम् - महाविद्यालयः (ज्वालापुरम्)

भारतोदयः

संस्कृत-मासिकपत्रम्

वर्षम् - ९५ अङ्कः- १

सम्पादकः

डॉ. हरिगोपालशास्त्री

व्याकरणाचार्यः

एम्.ए., पीएच्.डी.

राष्ट्रपति-पुरस्कृतः

सह-सम्पादकः

डॉ. केशवप्रसाद उपाध्यायः

साहित्याचार्यः

एम्.ए., पीएच्.डी.

प्रबन्ध-सम्पादकः

डॉ. अजयकौशिकः

साहित्याचार्यः

एम्.ए., पीएच्.डी.

प्रकाशकः

गुरुकुलमहाविद्यालयः ज्वालापुरम्

हरिद्वारम् - २४९४०५

(उत्तराञ्चल-प्रदेशः)

शुल्क-विवरणम्

प्रत्यङ्कम्	-	५/-
वार्षिकम्	-	५०/-
आजीवनम्	-	५००/-

विषयानुक्रमणिका

१- श्रुतिसुधा	-	महर्षिदयानन्दसरस्वती	३
२- वर्णाश्रमधर्माणां सामान्य-विवेचनम्	-	श्रीमोक्षानन्द अधिकारी	४
३- चित्रं ! चतुर्दशनिर्वाचनम्	-	श्री हरिश्चन्द्रः रेणापुरकरः	६
४- गायत्रीमन्त्रस्य जपविधिः - रक्षरसंख्याविचारश्च (१)	-	डॉ. व्रजेन्द्रकुमारसिंहदेवः	११
५- समुद्रदेव !	-	डॉ. अनन्तराममिश्रः 'अनन्तः'	१४
६- संस्कृत - समाचाराः	-	.....	१५
(i) निःस्वार्थभावेन संस्कृतस्य प्रचारः अस्माकं लक्ष्यं भवेत्	-	.....	१५
(ii) श्रद्धापूर्वकं समायोजितं गुरुपूर्णिमा-पर्व	-	.....	१७
(iii)'संस्कृतसाहित्यस्य विकास परम्परा' इति विषये दिल्लीसंस्कृत-अमादम्या गोष्ठी सम्पन्ना	-		१८
७- चातुरी	-	प्रो. अमरनाथपाण्डेयः	१८
८- कबीरवाणी	-	डॉ. निरञ्जनमिश्रः	१९
९- भारतवर्षदेशम्	-	श्रीनाथधरद्विवेदी	२०

[२० पृष्ठस्य शेषांशः]

भारतवर्षदेशम्

(८)

वीराः मृताः कार्गिल-सङ्गरे ये,
स्वभूमि-रक्षादि-विधानलग्नाः ।
निरासनार्थं द्विषतां परेषां
ते वन्दनीयाः परिरक्षणीयाः ।।

(९)

प्राणस्य चिन्ता न कदापि भूयात्
स्वदेश-रक्षा-हित-साधनार्थम् ।
इत्याशिषं वै वितरन्तु वीराः
राष्ट्रे वयं चापि सुजागृयाम ।।

(१०)

सम्भूय यत्नः सततं विधेयः
सर्वैः स्वराष्ट्रोन्नति-भूति-कामैः ।
निरस्य कष्टानि तमोयुतानि
प्रभा-रतं भारतमस्तु भूयः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ओ३म्

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भवभावनाभिलाषी ।
भगवति भुवि भक्ति-भावभाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ।।

* * * * * *

निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ।।

वर्षम्- ९५ | श्रावण २०६१ विक्रमाब्दः, जुलाई २००४ ईसवीयाब्दः | अङ्कः - १

श्रुति-सुधा

ओ३म् आश्रुत्कर्ण श्रुधी हवं नू चिद् दधिष्व मे गिरः ।
इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ॥

- ऋग्वेद १ / १० / ९

पदार्थः -

(आश्रुत्कर्ण) समन्तात् श्रुतौ विज्ञानमयौ श्रवणहेतू कर्णौ यस्य तत्सम्बुद्धौ। अत्र संपदादित्वात् 'सम्पादिभ्यः क्विप् (अ. ३ / ३ / ९४ वार्तिक)' इति वार्तिकेन करणे क्विप्। (श्रुधि) श्रृणु। अत्र 'बहुलं छन्दसि (अ. २ / ४ / ७३)' इति स्नोर्लुक्। 'श्रुशृणुपृकृवृभ्य.... (अ. ६ / ४ / १०२)' इति हेर्ध्यादेशः। (हवम्) आदातव्यं सत्यं वचनम्। (नु) क्षिप्रार्थे। 'नु इति क्षिप्रनामसु पठितम्। (निघं. २ / १५)' 'ऋचि तुनुघ..... (अ. ६ / ३ / १३२)' इति दीर्घः। (चित्) पूजार्थे। 'चिदिदं ब्रूयादिति पूजायाम्। (निरु. १ / ४)' (दधिष्व) धारय। 'दध धारणे' इत्यस्माल्लोट्, 'छन्दस्युभयथा (अ. ३/४/११७)' इत्यार्द्धधातुकाश्रयेणेडागमः। (मे) मम स्तोतुः। (गिरः) वाणीः। (इन्द्र) सर्वान्तर्यामिन् सर्वतः श्रोतः!। (स्तोमम्) स्तूयते येनासौ स्तोमः, तं स्तुतिसमूहम्। (इमम्) प्रत्यक्षम्। (मम) स्तोतुः। (कृष्व) कुरु। 'कृञ्'- इत्यस्माल्लोटि विकरणाभावः। (युजः) यो युनक्ति स युक् सखा, तस्य सख्युः। 'युजिर् योगे' इत्यस्माद् 'ऋत्विग्दधृग्..... (अ. ३/२/५९)' इति क्विन्। (चित्) इव। 'चिदित्युपमार्थे (निरु. १ / ४)' (अन्तरम्) अन्तःशोधनमाभ्यन्तरं वा ॥ ९ ॥ अत्रोपमालङ्कारः।

भावार्थः -

मनुष्यैरीश्वरस्य सर्वज्ञत्वेन जीवेन प्रयुक्तस्य वाग्व्यवहारस्य यथावत् श्रोतृत्वेन सर्वाधारत्वेवान्तर्यामितया जीवान्तःकरणयोर्यथावच्छोधकत्वेन सर्वस्य मित्रत्वाच्चायमेवैकः सदैव ज्ञातव्यः प्रार्थनीयश्चेति ॥ ९ ॥

- महर्षिदयानन्दसरस्वती
[ऋग्वेदभाष्यम्, प्रथमो भागः, ५८३ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्णाश्रमधर्माणां सामान्य-विवेचनम्

- श्री मोक्षानन्द अधिकारी
द्वारा 'गाण्डीवम्' संस्कृतसाप्ताहिकम्
सम्पूर्णानन्द संस्कृतविश्वविद्यालय
वाराणसी (उ.प्र.)

वेदशास्त्रानुसारं यजनं, याजनं, दानं, प्रतिग्रहः, अध्ययनम्, अध्यापनं च एते ब्राह्मणानां कर्माणि सन्ति। दानम्, अध्यापनं, यज्ञश्च क्षत्रियाणां वैश्यानां च साधारण-धर्मोऽस्ति। एतिदतिरिक्तं दण्डः क्षत्रियाणां कृते कृषिकर्म च वैश्यानां कृते विशेषधर्मरूपेण स्वीकृतोऽस्ति।

ब्राह्मण-क्षत्रिय-वैश्यानां सेवाकरणम् एव शूद्राणां धर्मः अस्ति। शिल्पकला च तेषां आजीविका विशेषधर्मश्चास्ति। धर्मानुसारं ते पाकयज्ञसंस्थायाः निर्वहणमपि कर्तुं शक्नुवन्ति।

भिक्षाचरणं, गुरोः सेवनम्, स्वाध्यायः सन्ध्योपासनम् एते ब्रह्मचारिणां धर्माः सन्ति । चतुर्णाम् आश्रमाणां भेदद्वयं मन्यते। एतस्यानुसारं ब्रह्मचारिणां कृते उपकुर्वाणं, नैष्ठिकं चेति भेदद्वयमस्ति। ये द्विजाः विधिवूर्वकं वेदादिशास्त्राणाम् अध्ययनपूर्वकं गृहस्थाश्रमे प्रविष्टाः भवन्ति, ते उपकुर्वाणाः सन्ति। ये मृत्युपर्यन्तं गुरुकुले निवसन्तः वेदादिशास्त्राणाम् अध्ययनं कुर्वन्ति, ब्रह्मतत्पराः च भवन्ति ते नैष्ठिकब्रह्मचारीति उपाधिना ज्ञायन्ते।

अग्निकार्यम्, अतिथि-सत्कारः, दानं यज्ञं तथा च देवार्चनं एते गृहस्थानां संक्षिप्तधर्माः सन्ति। यः गृहस्थः स्वपरिवारस्य भरण-पोषणे संलग्नो भवति, सः साधकः अस्ति। यो हि गृहस्थः पितृऋणं, देवऋणं तथा च ऋषिऋणं एभ्यः ऋणेभ्यः मुक्तो भूत्वा स्वभार्यायाः धनानामपि त्यागपूर्वकं एकाकी संन्यस्येथवा 'फलाहारी' भूत्वा धर्माचरणार्थं विचरति, अन्यान् च वञ्चयित्वा स्वयमेव अधिकाधिकं भक्षयति सः उदासीन-गृहस्थः मौक्षिकश्च कथ्यते।

भूमिशयनं, फलमूलस्य आहारः, वेदादि-शास्त्राणाम् अध्ययनं, मननं, तपः तथा च स्वसम्पत्तेः यथोचितविभागः वानप्रस्थाश्रमस्य धर्मः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्ति। यः वानप्रस्थः अरण्ये तपश्चर्यां करोति, देवार्चनं करोति, तेभ्यः आहुतिं ददाति, सदैव स्वाध्याये समनुरक्तो भवति सः वानप्रस्थः तापसोत्तमः कथ्यते। अनेनैव प्रकारेण यो हि वानप्रस्थः तपसा स्व-शरीरम् अत्यन्तं क्षीणं कृत्वा सदैव ईश्वरध्याने निमग्नो भवति, सः वानप्रस्थाश्रमे निवसन्नपि साक्षात् सन्तरूपेण एव ज्ञायते।

यो हि संन्यासाश्रमी नित्य-योगाभ्यासेऽनुरक्तो भूत्वा ब्रह्मप्राप्तेः तत्त्व-प्राप्तेश्च सप्रयासो जितेन्द्रियश्च भवति, सः पारमेष्ठिक-संन्यासीति कथ्यते। ये सदैव आत्मतत्त्वानुसन्धाने निमग्नाः भवन्ति, नित्यतृप्ताः सन्ति, सदा संयम-नियमेन निवसन्ति ते महामुनयः 'योगिनः' कथ्यन्ते। भिक्षाचरणं, वेदाध्ययनं, मौनावलम्बनं, तपः, ध्यानं सम्यक् ज्ञानं तथा च वैराग्यम् एते संन्यासिनां धर्माः मन्यन्ते।

पारमेष्ठिक-संन्यासिनः त्रिविधाः भवन्ति (१) ज्ञानसंन्यासी, (२) वेदसंन्यासी, (३) कर्मसंन्यासी च। योगिनः अपि त्रिविधाः भवन्ति (१) भौतिकाः, (२) अन्त्याश्रमिणः, (३) योगिनश्च। एते त्रयः एव योगमूर्तिस्वरूपे परमात्मनि आश्रये आश्रिताः भवन्ति।

मानवस्य धर्मेण एव मुक्तिः भवति। अर्थेन केवलं कामस्य, पुरुषार्थस्य च प्राप्तिः सम्भवति। वेदेषु द्विधं कर्म कथ्यते (१) प्रवृत्तिः, (२) निवृत्तिश्च। वेदशास्त्रानुसारम् अग्न्यादिदेवाः एवं गुरु-विप्रादीनां संतुष्टि-सम्बन्धि यत् कर्म निर्दिष्टमस्ति तत् प्रवृत्तिकर्मः, एवं च सविधि कर्मानुष्ठानपूर्वकं यत् हि कर्मः क्रियते तत् निवृत्तिकर्मः कथ्यते।

क्षमा, दानं, दया, निर्लोभता, स्वाध्यायः, तीर्थानामनुसरणं; सत्यं, सन्तोषः, आस्तिक्यं, इन्द्रिय-निग्रहः, देवार्चनं, विशेषरूपेण ब्राह्मणानां पूजनम्, अहिंसा, प्रियवादित्वम्, अरुक्षता, अपैशून्यं च एते गुणाः चतुर्षु एव आश्रमेषु[1] सामान्य-धर्मरूपेण स्वीक्रियन्ते।

***

१ कल्याण (वर्ष-७४) इत्यस्य प्रथमाङ्के ।

क्षमा दमो दया दानमलोभाभ्यास एव च । आर्जवं चानसूया च तीर्थानुसरणं तथा ॥
सत्यं सन्तोष आस्तिक्यं तथा चेन्द्रियनिग्रहः । देवानामर्चनं पूजा ब्राह्मणानां विशेषतः ॥
अहिंसा - प्रियवादित्वमपैशून्यममरूक्षता । एते आश्रमिका धर्माश्चातुर्वर्ण्यं ब्रवीम्यतः ॥

(४९/२१-२४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चित्रं ! चतुर्दशनिर्वाचनम्

- श्री हरिश्चन्द्रः रेणापुरकरः
मामडी-निवासः गवर्नमेन्ट पॉलिटैक्नीकस्य पुरतः
ऐवानशाही-विभागः, गुलबर्गा (कर्णाटक)

(१)

क्रिस्तैकविंशशतकस्य चतुर्थवर्षे
ह्यप्रेलविंशदिवसान्मयिमासयावत्।
देशे चतुर्दशतमं वरणं बभूव
भूकम्प एव विषये खलु तेन जातः॥

(२)

स्वप्नेऽपि नैव परिकल्पितचिन्तितोऽसौ
यस्मिन् करालतमघोरपराभवोऽभूत्।
तद्भारतीयजनतादलवाजपेयि-
सञ्जीतनैकदलराष्ट्रिय-शासनस्य॥

(३)

कांग्रेसशासितचरं त्रितयं च राज्यं
षण्मासपूर्ववरणे विजितं बभूव।
तस्मात् स्थितिश्च सुतरां वरणाय योग्या
हीत्थं विचार्य घुषितं वरणं स्वदेशे॥

(४)

तत्कालमेव वरणं नहि योजितं तैः
काले गते च खलु मासचतुष्टयस्य।
या काऽपि वीचिरभवत् खलु भा.ज.पस्य
कांग्रेस-तीव्रतुमुलप्रसराद् विलीना॥

(५)

देशेऽप्यवर्षणवशात् स्थितिमुग्रघोरां
नैराश्यदूनशतशःकृषकात्महत्याम्।
निर्वृत्तितां च विनिवेशवशात् प्रचण्डां
दृष्ट्वाऽपि घोषितमभूद् वरणं ह्यकाले॥

(६)

सौख्यानुभूतिमथ भारतदीप्तिशालि
हीत्थं प्रचारकरणे ॐ व्ययितं बभूव।
केन्द्रियशासकजनैर्बहुकोटिवित्त-
मात्मप्रशस्तिपरभारतनायकैश्च॥

(७)

अत्यात्मतुष्टिपर-भा.ज.प.नायकैश्च
आसेतुशैलविषये विहितः प्रचारः।
देशस्य नागरजनेषु समृद्धिमत्सु
ग्रामीणदीनजनता गणिता न दृप्तैः॥

(८)

पञ्चाशतब्दसमयस्य सुदीर्घकाले
कांग्रेसशासकजनैर्विहितं न कार्यम्।
तद् भा.ज.पेन विहितं ननु पञ्चवर्षे
हीत्थं प्रचार इह तैर्विहितो जनेषु॥

(९)

कांग्रेसराष्ट्रियदलाधिपसोनियायाः
प्रश्नं विदेशजननस्य पुनश्च नूनम्।
उत्थाप्य देशवरणे विहितः प्रचारो
नैकैश्च भा.ज.प.जनैरवरस्तरीयः॥

ॐ Feel Good and India Shining

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१०)

कामं बभूव जननं ह्यपि सोनियाया
देशान्तरे च बहुदूरमिटालिदेशे।
राजीवमंत्रिवरधर्मवधूश्च भूत्वा
जाता स्नुषाऽपि खलु भारतवर्षभूमेः॥

(११)

स्वीकृत्य नागरिकतामपि भारतस्य
पूर्णा बभूव नियतं खलु भारतीया।
सर्वोच्चमन्त्रिपदवीमपि धारणाय
योग्या बभूव सुतरां ननु सोनिया सा॥

(१२)

पोरोऽपि भारतभुवः परदेशजातो
मंत्रिप्रधानपदमर्हति चेन्न देशे।
तादृक् न घोषितमभूत् खलु संविधाने
तस्मान्महोच्चपदमर्हति सोनिया सा॥

(१३)

देशस्य नागरिकतामपि धारयंश्चेत्
योग्यो विदेशजननान्न महापदाय।
संशोधनं सपदि भारतसंविधाने
तादृग् विधेयमभवत् खलु संविधाने॥

(१४)

सार्वत्रिके च वरणे खलु सोनिया सा
चक्रे प्रचारमिह निम्नजनेषु देशे।
बभ्राम सर्वविषये विदधत् प्रचारं
ह्येकाकिनीव गगने ननु चन्द्रलेखा॥

(१५)

आसेतुशैलविषये खलु केवला सा
गत्वा च कर्मकर-कर्षक-सेवकेषु।
तेषां विलोक्य विकरालदशां नितान्तं
त्यक्तुं च भा.ज.प.दलं जनतां ययाच॥

(१६)

तद्भारतीयजनतादलनायकैश्च
तस्या विरुद्धमकृतोग्रतरः प्रचारः।
दास्ये निबद्धमिह सन्ति दिदृक्षवः किं
देशं पुनश्च सुजना! इति तेऽन्वयुञ्जन्॥

(१७)

श्रीवाजपेयिसदृशः प्रतिपक्षिनेता
कांग्रेसपक्षसविधे भवतीति किं भोः!।
इत्येव सोपहसितं परिपृष्टमासीत्
ज्ञात्वाऽपि सम्यगिह तां प्रतिपक्षनेत्रीम्॥

(१८)

मंत्रिप्रधानपदलिप्सुरहं न लोके
कांग्रेससांसदजनेषु वृतो भवेद् यः।
नेताऽपि संसदि दलस्य भवेत् स एव
ह्येवं तयैव घुषितं खलु पूर्वमेव॥

(१९)

मौहर्विकैश्च गणकैरपि पत्रकारैः
कांग्रेसपक्षसहयोगिदलाभिभूत्या।
बी.जे.पी. पूर्णविजयश्च समर्थितोऽभूत्
केनापि नैव विदितं मतदातृचित्तम्॥

(२०)

अन्ते त्रयोदशदिनेऽतिविचित्रमेव
निर्वाचनस्य फलितं घुषितं बभूव।
स्वप्नेऽपि भा.ज.प. जनैर्नहि कल्पितोऽसौ
जातोऽस्ति भा.ज.प. दलस्य करालभङ्गः॥

(२१)

यस्या विरुद्धमतिहीनतरः प्रचारः
बी.जे.पि.नायकजनैर्विहितो बभूव।
नूनं तयैव खलु सोनियया स्वपक्षो
नीतोऽस्ति भव्यविजयस्य महोच्चशृङ्गम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२२)

तस्या दलस्य सदने बहुसंख्यकत्वाद्
नेता दलस्य सदनेऽपि वृता ह्यभूत् सा।
सम्प्रार्थिता भवितुमेव महाप्रधानं
राष्ट्राधिपैरपि तदर्थनिमन्त्रिता सा॥

(२३)

वैदेशिकाऽपि महिला यदि सोनिया सा
देशप्रधानसचिवोऽत्र नियोक्ष्यते चेत्।
त्यक्ष्यन्त एव स्वपदानि निषेधरूपं
ह्येवं विघोषितमभूत् सुषमा-उमाभ्याम्॥

(२४)

आसेतुशैलपरमं च समस्तदेशे
ह्यान्दोलनं च विकरालमहोग्रघोरम्।
तस्या विरुद्धमिह भारतवर्षदेशे
सञ्चालयिष्यत इतीह विघोषितं तैः॥

(२५)

घोरामशान्तिमपि वारयितुं स्वदेशे
श्वश्रूपतीव निजघातमपीह हर्तुम्।
सर्वोच्चराष्ट्रपदवीं स्वयमेव लब्धां
त्यक्त्वा बभूव महती खलु सोनिया सा॥

(२६)

सर्वोच्चगौरवपदं स्वयमागतं च
त्यक्त्वा सहर्षमिह देशहिताय नूनम्।
तस्या महोज्ज्वलसमर्पणभावनायाः
नूनं सुदुर्लभमुदाहरणमस्ति लोके॥

(२७)

तस्या विरुद्धमतिहीनतरात् प्रचाराद्
बी.जे.पि. धुर्यलघुता-सममेव नूनम्।
देशे प्रसिद्धिरभवत् खलु सोनियायाः
तेन प्रभावितमभूज्जनमानसं च॥

(२८)

सामान्यसेवकभूतेरपि सा न योग्या
ह्रीत्युग्रघोरघृणितो विहितः प्रचारः।
बी.जे.पि. नायकजनैर्वरणाभियाने
तस्मादपीह विपरीत-मतं बभूव॥

(२९)

निर्वाचितस्य जनतान्त्रिकमान्यरीत्या
घोरं निषेधकरणं नहि युक्तमासीत्।
तत्रापि नूनमबलाजनसोनियायाः
इत्युच्च-भाजपजनैः कथनीयमासीत्॥

(३०)

राष्ट्रप्रधानसचिवस्य महापदे तं
विश्वासपात्र-मनमोहनसिंह-धुर्यम्।
सद्यो नियोज्य समभूत् खलु सोनिया सा
पक्षाधिपेन सह शासनसूत्रधात्री॥

(३१)

कांग्रेसशास्तिरपि सा मनमोहनस्य
कांग्रेसभीषणविरोधकसाम्यवादि-।
पक्षाश्रयेण रचिताऽपि चलेन्न दीर्घं
तस्य प्रपीडनवशाद् विकलीकृता स्यात्॥

(३२)

तत्सोनिया-प्रतिकृतिर्विहिता वृथा तै
राष्ट्रेतिवृत्तवरसंस्कृतिबोधहीना।
जाताऽपि भारतभुवः सचिवप्रधानो
नैवाभविष्यदिह सा सफला कदाचित्॥

***

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चित्रं ! चतुर्दशनिर्वाचनम् (२)

- प्रा. हरिश्चन्द्रः रेणापुरकरः
मामडी-निवासः गवर्नमेन्ट पॉलिटैक्नीकस्य पुरतः
ऐवानशाही-विभागः, गुलबर्गा (कर्णाटक)

भा.ज.प.पराभव-समीक्षा

(३३)

अत्यात्मतुष्टिपरदर्पमदावलिप्त-
तद्भारतीयजनतादलनायकानाम्।
देशस्य दीनदलितानपि कार्यकर्तॄन्
घोरं ह्युपेक्ष्य विकराल-पराभवोऽभूत्॥

(३४)

भ्रष्टत्वहीनशुचिनिर्मलपूतपक्षः
इत्येव यस्य विषये समभूत् प्रसिद्धिः।
सा खण्डिता तहलका-घटनेन नूनं
तेनापि लोकमतमस्य गतं विरुद्धम्॥

(३५)

राष्ट्रस्य रक्षणविधावपि भा.ज.पस्य
घोरप्रमादसममेव च कार्गिलीय-।
पाकाक्रमस्य विषयेऽपि महाप्रमादाद्
रुष्टैर्जनैः परिहृतः खलु भा.ज.पोऽसौ ॥

(३६)

गोध्रासमीपकृतहिन्दुजनोग्रहत्यां
विस्मार्य तत्प्रतिकृतिं विषये प्रचार्य।
भ्रान्तं कृतं जनमतं प्रतिपक्षिधुर्यै-
स्तेनापि भा.ज.प.दलस्य पराभवोऽभूत् ॥

(३७)

ग्रामीण-दीनजन-कर्षक-कर्मिणां च
घोरोग्रगर्हित- दशापरिवर्तनाय।
बी.जे.पि. नायकवरैर्विहितं न किञ्चित्
तेनापि तस्य किकराल-पराभवोऽभूत् ॥

(३८)

बी.जे.पि.नायकजनैर्मतलाभहेतो-
र्जात्यन्धमुस्लिम-जनैर्विहितोऽभिसन्धिः।
तस्माद्धि भा.ज.प. दलं नहि भिन्नमेव
कांग्रेसराष्ट्रिय-दलादिति वर्जितं तैः ॥

पराभवस्य प्रमुखहेतवः

(३९)

हिन्दुत्वमेव सततं पुरतो निधाय
साफल्यमर्जितमभूत् खलु भा.ज.पेन।
सत्तार्थमेव च तदेव विहाय सर्वं
सख्यं व्यधायि खलु तेन विचित्रपक्षैः॥

(४०)

देशे समानविधिनागरसंहितार्थं
श्रीराममन्दिरकृतेऽपि च कश्मिरस्य ।
सम्पूर्णमेव विलयं विषये विधातुं
सङ्गीर्य येन विजितं वरणं बभूव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(४१)

तेनैव भा.ज.प.दलेन ततो विजित्य
स्थानद्वयाच्च शतकद्वयमेव नूनम् ।
सत्तार्थमेव खलु तत् त्रितयं विहाय
हा हन्त! तेन विहिताऽत्र युतिर्विचित्रैः ॥

(४२)

श्रीराममन्दिरकृते सकलेऽपि देशे
कृत्वा प्रचारमिह विंशतिवत्सराणि ।
श्रीरामचन्द्ररथभारतयात्रया च
देशं च राममयमेव विधाय सर्वम् ॥

(४३)

लोकान् प्रलोभ्य रघुनन्दनपूतनाम्ना
निर्वाचनानि च विजित्य समस्त-देशे।
अन्ते निरस्य रघुनन्दनमेव कार्याद्
विश्वासघात इह तैर्विहितो जनानाम् ॥

(४४)

पाकप्रचोदित-समर्थितघोरजाल्मैः
प्रायश्चतुर्दशसहस्रनिरीहलोकाः।
आक्रम्य कश्मिरभुवि प्रहता नृशंसै-
स्तेषां विरुद्धमिह किं विहितं धुरीणैः ॥

(४५)

योधाः प्रविश्य निहताः खलु रक्तदुर्गे
आकाशयानमपि तैरपहृत्य नीतम् ।
आसादिता विधिसभा ह्यपि कश्मिरस्य
देशस्य संसदपि तैः सहसाऽभियुक्ता ॥

(४६)

गोध्रासमीपमवरुध्य च रेलयानं,
निष्पाप-षष्टि-रघुनायकभक्तवर्याः।
जीवन्त एव विहिता खलु भस्मसात् तैः
पेट्रोल-तैलमभिषिच्य महोग्रजाल्मैः ॥

(४७)

तत्रैव गान्धिनगरेऽक्षरधाम नाम
हिन्दूपवित्रतममन्दिरमेव जाल्मैः।
आक्रम्य त्रिंशदधिका निहताश्च भक्ताः
विद्धाश्च तत्र शतशो गुलिका-प्रहारैः॥

(४८)

जम्मुस्थितं च रघुनायकमन्दिरं त-
दाक्रम्य घोरकितवैः पुनरेकवारम्।
हत्वा चतुर्दशजनान् प्रकटीकृतं तद्
दौर्बल्यमेव खलु भा.ज.प. शासनस्य ॥

(४९)

पाकात्मघातिकितवा विषये प्रविश्य
निष्पापबालमहिला अपि घातयन्ति।
रक्षाधिकारिशिविराणि समं च तेषां
लक्ष्यं भवन्ति मठमन्दिर-दैवतानि ॥

(५०)

राष्ट्रस्य रक्षणकृते विहितप्रतिज्ञैः
किं तस्य पालनमिहाचरितं धुरीणैः।
निष्पापनिर्मलनिरीह-जनान्तकानां
तीव्रं निषेधकरणाद् विहितं किमन्यत्।।

(५१)

देशस्य संसदि कृते विकटाक्रमे तै-
र्निर्णायकं खलु भविष्यति युद्धमेतत्।
वाक्शूर-नायकवरैर्घुषितं महोच्चैः
कार्यं तु शून्यमभवत् शतशो हतास्तैः ।।

(५२)

प्रत्याक्रमेण खलु पाकविनिग्रहार्थं
सौवर्णसन्धिरिव नूनमभूत् प्रसङ्गः।
सङ्कल्पशून्यदृढनिश्चयहीनधुर्यैः
प्रच्यावितस्तु सहसा व्यपदेश-शीलैः ॥

(५३)

दौर्बल्यमेव खलु भा.ज.प. शासकानां
राष्ट्रस्य रक्षणकृतेऽपि विलोक्य लोकैः।
सत्तार्थमेव जहतां वरतत्त्वजातं
त्यागः कृतोऽस्ति वरणे पटुभारतीयैः ॥

❋ ❋ ❋

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गायत्रीमन्त्रस्य जपविधिरक्षरसंख्याविचारश्च (१)

- डॉ. व्रजेन्द्रकुमारसिंहदेवः
साहित्य-प्राध्यापकः
गुरुकुल महाविद्यालयः ज्वालापुरम्
हरिद्वारम्-२४९४०५ (उत्तराञ्चलम्)

'न गायत्र्याः परो मन्त्रः।' अर्थाद् गायत्रीमन्त्रात् श्रेष्ठः कोऽपि मन्त्रो नास्ति। सन्ध्योपासनस्य गायत्रीमन्त्रस्य च जपो न केवलं ब्राह्मणस्य कृते परमावश्यकः कर्त्तव्यो वर्तते अपितु त्रैवर्णिकस्य (ब्राह्मण-क्षत्रिय-वैश्यश्च) मात्रस्य कृतेऽपि परमावश्यकोऽस्ति। संसारे सन्ध्योपासनं विना यानि यानि नित्य-नैमित्तिकानुष्ठानानि च भवन्ति, तेषां किमपि फलं नास्ति।

गायत्री तु ब्राह्मणाय सुरक्षा-कवचोऽस्ति। गायत्री-जपेन हि ब्रह्मतेजसः प्राप्तिर्जायते, यस्य सम्मुखे सर्वे नतमस्तका भवन्ति। अस्मिन् क्षणे सर्वाधिकमाक्रोशम् आक्रमणञ्च ब्राह्मणानामुपरि प्रचलति तथा च ब्राह्मणोऽपि स्वकर्त्तव्यात् च्युतो भूत्वा स्व-सहजशक्तिं ह्रासयति। इदानीं तु ब्राह्मणस्य कृते सावधानतया स्वकर्त्तव्यं पालनीयं तथा च स्वकीयां क्षतिग्रस्तामूर्जामेते पुनः संस्थापयन्तु, अन्यथा एतेषां केवलम् अपमानं हि अपमानं भविष्यति, परन्तु एते किमपि न करिष्यन्ति!

अत्र गायत्रीमन्त्रस्याक्षरसंख्यानां विवेचनं जपविधेर्नियमञ्च प्रस्तौमि। अथ गायत्रि-मन्त्रः प्रस्तूयते -

'ओ३म् भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।'

- शु.यजुर्वेद ३६/३

गायत्रीमन्त्रस्य प्रथमपादे 'वरेण्यम्' पदमस्ति। गायत्रीजपकारिणां जपसमये 'वरेणियम्' तथा वेद-पारायणादिकाले 'वरेण्यम्' हि पाठः पठनीयः। यथा वृद्धयोगियाज्ञवल्क्य-स्मृतौ कथितम्-

पाठकाले वरेण्यं स्याज्जपकाले वरेणियम्।

छन्दोवद्धेषु वैदिकमन्त्रेषु यत्रैकाक्षरस्य न्यूनता जायते, तत्र 'इ' अथवा 'उ' स्वराक्षरेणाक्षरसंख्यायाः पूर्तिः क्रियते। इयं तु वैदिकपरम्परा वर्तते। वैदिकसम्प्रदायस्य मुख्याधारं पिङ्गलाचार्येण कृतं छन्दःसूत्रमिति। पिङ्गलाचार्येण स्वकीय-छन्दःसूत्रस्य तृतीयेऽध्याये 'इयादि पूरणः' सूत्रं लिखितम्। यस्य निष्कर्षस्तु यत्राक्षरसंख्या पूर्णा न भवति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समुद्रदेव !

- डॉ. अनन्तराममिश्रः 'अनन्तः'
गोला गोकर्णनाथ, खीरी - २६२८०२ (उ.प्र.)

(११)

उत्तालवीचिपरिपूरितघूर्णयन्तं
नृत्यं यथा प्रतनुषे स्वरतालयुक्तम्।
इष्टं ददासि भुवनं त्वमनादिशक्तिः
रत्नाकरोऽसि बहुरत्नविलुण्ठनेऽपि ।।

(१२)

यज्ञोपवीतमतिरिच्य समग्रवस्तून्
गृह्णासि पूजनपरैः न नरैः समुद्र !।
विप्रं भणन्ति मनुजा अत एव त्वं वै
तारस्वरेण पठसीव सुवेदमन्त्रान् ।।

(१३)

सन्ति प्रभूतशिशुमारझषाष्टपादाः
लोके जलस्य जलमानवनक्रसर्पाः।
सिन्धो जलाश्वतिमयः सुविशालकायाः
सृष्टिर्विचित्रमति ते बहुरूपभेदा ।।

(१४)

दोलायमानमपि तुङ्गतरङ्गदोलैः
शालीनतां त्यजसि सागर! नो कदापि।
देवेन्द्रवज्रभयभीतमहीधराणां
त्वं वै शरण्यमसि हे सुगभीर मीर ।।

(१५)

अट्टाट्टहासगुरुगर्जनकृद् तरङ्गान्
धुन्वन् जटाजलद ताण्डवकारि रुद्र !।
आभासि भीतमशिवं तु सरित्पति त्वं
लोके तथापि शिवमातनुषे सदैव ।।

(१६)

लावण्यमस्ति भुवि ते खलु सुप्रसिद्धं
तस्मात् कथंचिदपतृप्ततृषा जनानाम्।
अन्यत्र याति मधुरस्य जलस्य पूर्त्यै
सिन्धोः महत्त्वं विफलं हि समुद्गिरन्ती ।।

(१७)

दृप्तः सदैव भुवि वृष्टिनिमित्तरूपः
दृष्टो न किन्तु विततो जलराशिगर्भे।
भोगेन भोगवदतृप्तवनेन्धनाढ्यः
वाष्पीकरोति तव जीवनसौर्ववह्निः ।।

(१८)

वप्रस्थनागरगृहैरवकीर्णरम्यौ
संभाति संविशदवैद्युतकान्तिकान्ता।
पीताम्बरे लसति ते त्वसिताङ्गशोभा
वीच्यर्चयः प्रकटयन्त्यथवौर्ववह्निम् ।।

(१९)

मेघान् ददाति शुचिमम्बु यदापगापः
वृष्ट्यां तमेव सरितः मलिनप्रवाहैः ।
नीत्वा मिलन्ति जलधिं खलु सत्यमुक्तं
नार्यः भवन्ति गृहवस्तुसुसंग्रहोत्काः ।।

(२०)

पूर्वप्रतीचियमदिक्षु समुद्रदेव !
रक्षां करोसि परिखेव तु भारतस्य ।
धत्से शतघ्नसहितं जलसैन्यपोतान्
राष्ट्रस्य पुष्टि-करणाय नमो नमस्ते ।।

(२१)

उद्योगसिन्धुमथनोद्गतमर्थकामं
ब्रह्मास्वरूपसलिले मिलितं दुरन्तम् ।
प्राज्यं प्रदूषणकलाहलमध्य हन्त!
शम्भो त्वमेव कुरु पालनमनुग्रहेण ।।

**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृत-समाचाराः

निःस्वार्थभावेन संस्कृतस्य प्रचारः अस्माकं लक्ष्यं भवेत्

- ऋषि-महाराजाः

हरिद्वारम्। अत्र ऋषिसंस्कृतमहाविद्यालये निर्धननिकेतने संस्कृतम्भाषणशिक्षकप्रशिक्षणवर्गस्य दीक्षान्तसमारोहे स्वदीक्षान्तभाषणं ददत् निर्धननिकेतन-ऋषिसंस्कृत-महाविद्यालयादीनां संस्थानां संस्थापकाः स्वामिनः ऋषिवर्याः बालब्रह्मचारिणः केशवानन्द-महाराजाः प्रतिभागिनः सम्बोधयन्तः उक्तवन्तः यत् भारतं विदुषां भूमिः आसीत्। अत्र सर्वत्र संस्कृतभाषा एव भाष्यते स्म। अत्र एतादृशाः राजानः आसन् ये प्रतिज्ञां कृतवन्तः यत् मम राज्ये कश्चिद् मूर्खजनः न स्थास्यति।

भोजराजस्य उदाहरणं ददत् ते उक्तवन्तः यत् राजा प्रतिज्ञां कृतवान् यत् मम राज्ये कश्चिदपि मूर्खः न स्थास्यति। एतद् द्रष्टुं सः वेशं परिवृत्य यदा एकस्य भारवाहकस्य पार्श्वे गच्छति तदा तं पृच्छति भोः भारवाहक! भारः बाधति किम्? राज्ञः एतद् वचनं श्रुत्वा भारवाहकः भारं प्रक्षिप्य उक्तवान् यत् न भारः बाधते तावत् यावत् बाधति बाधते। तात्पर्यम् अस्ति भारवाहकः अपि तादृशः विद्वान् आसीत् यत् सः व्याकरणदोषं ज्ञात्वा राजानम् अपि निःसङ्कोचं वदति। अनन्तरं यदा राजा विदुषः कृते एकस्य कुविन्दस्य गृहं मूर्खस्य गृहं इति मत्त्वा रिक्तं कारयति, तदा कुविन्दः राजानम् उक्तवान् यत् राजन्! अहं काव्यं तु करोमि परन्तु चारुतरं न करोमि। यदि यत्नपूर्वकं करोमि तर्हि चारुतरम् अपि कर्तुं शक्नोमि। भूपालमौलिमणि- मण्डितपादपीठ! हे साहसाङ्क! अर्थात् अनेके राजानः आगत्य यस्य पादयोः प्रणमन्ति तादृशः साहसस्य अवतार! भवान् यदा इच्छेत् तथा अहं करवाणि अर्थात् कवयामि वयामि यामि वा। इत्यस्य काव्यपूर्णम् आलङ्कारिकं पद्यं श्रुत्वा राजा सन्तुष्यति यत् एषः कुविन्दः तु उच्चकोटेः विद्वान् अस्ति, तदा राजा तस्मै अपि पुरस्कारं ददाति।

ऋषिवर्यः उक्तवान् यत् भवन्तः सर्वे एव कार्यकर्तारः इतः गत्वा स्व-स्वस्थानेषु संस्कृतप्रचारं करिष्यन्ति। अस्माकं देशस्य सर्वं ज्ञानं विज्ञानं संस्कृते एव निहितम् अस्ति। भवतां प्रमुखं कर्म अस्ति यत् भवद्भिः एकस्यापि शास्त्रस्य अध्ययनं निरन्तरं करणीयम्। योग्यतां विना कश्चिदपि जनः किमपि कर्तुं न शक्नोति। समारोहे समुपस्थिता महाविद्यालस्य प्राचार्या वर्गाधिकारिणी च डॉ. सतीश गुलाटी कार्यकर्तॄणां प्रशिक्षणं प्रशंसितवती। सा उक्तवती यत् एतत् तपः भवति। तपः चरित्वा एव कश्चिद् जनः महत्त्वं प्राप्नोति। भवद्भिः तपः आचरितम्। साम्प्रतं कार्यक्षेत्रं गत्वा संस्कृतप्रचारकार्यं मनसा वाचा कर्मणा करणीयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनन्तरं समापनसमारोहे समागताः मुख्यातिथयः गुरुकुलकांगड़ीविश्वविद्यालयस्य उपकुलपतयः प्रो. वेदप्रकाशशास्त्रिणः प्रतिभागिभ्यः स्वाशिषं ददत् उक्तवन्तः यत् संस्कृतप्रचारनिमित्तं सम्भाषणाद् अन्यः मार्गः एव नास्ति। ते सम्भाषण-माध्यमस्य महत्त्वं प्रतिपादितवन्तः। ते उक्तवन्तः यत् कथं दशदिवसेषु एव अत्र आगत्य प्रतिभागिनः संस्कृतेन सम्भाषणस्य प्रयासं कुर्वन्ति एतत् प्रशस्यम् अस्ति। ते उक्तवन्तः यत् संस्कृतभाषायाः माध्यमेन एव भारतस्य भविष्यं गौरवमयं भविष्यति। अन्येषाम् अनुकरणेन कश्चिदपि गौरवं प्राप्तुं न शक्नोति। अस्मिन् अवसरे सभाध्यक्षाः निजात्मप्रेमधाम्नः परमाचार्याः महन्ताः शिवप्रेमानन्द-पुरीमहाराजाः उक्तवन्तः यत् संस्कृतप्रचारकार्यं संस्कृतभारत्या निरन्तरम् अबाधगत्या क्रियते। सः उक्तवान् यत् अस्मिन् महति कार्ये अस्माकं यस्य कस्यापि सहयोगस्य आवश्यकता भविष्यति, वयं सदैव तत्पराः भविष्यामः।

अस्मिन् अवसरे मेरठ-प्रान्तस्य संस्कृतभारत्याः संयोजकः वाचस्पतिः अपि स्वविचारान् प्रकटितवान्। इतः पूर्वं प्रतिभागिभिः मातृ-अर्चना कार्यक्रमः सम्पादितः यस्मिन् प्रत्येकं कार्यकर्ता भारतमातुः समक्षम् एकम् एकम् दीपं प्रज्ज्वाल्य संस्कृतकार्यार्थम् आत्मनः अपि समर्पणम् अभिव्यक्तवान्। अनन्तरं कार्यकर्तॄन् सम्बोधयन् प्रदेशाध्यक्षः डॉ. बुद्धदेवशर्मा उक्तवान् यत् साम्प्रतं भवन्तः भारतमातुः समक्षम् अर्चनां कृतवन्तः। परन्तु भारतमातुः तत् गौरवपूर्णं चित्रम् अपि स्मरन्तु यत् कथं भारतं सुवर्णचटका कथ्यते स्म। कथं जनाः भारतं जगद्गुरुम् इति सम्बोधयन्ति स्म। अत्रत्याः नालन्दा-तक्षशिला-सदृशाः विश्वविद्यालयाः विश्वविख्याताः आसन्। ज्ञानज्योतिः भारताद् एव विश्वे प्रसरति स्म। तदा भारतस्य भाषा संस्कृतम् आसीत्। भारतस्य सर्वा ज्ञानराशिः अस्यां भाषायाम् एव निहिता अस्ति। तर्हि किं जातं यत् भारतस्य सर्वं गौरवं विनष्टम्। भारतं दरिद्रं सञ्जातम्। अद्य भारतमाता भवादृशान् संस्कृतकार्यकर्तॄन् अवलोकयति, ये तस्य गौरवं पुनः स्थापयेयुः। ये संस्कृतभाषां पुनः जनभाषां कर्तुं सङ्कल्पवन्तः भूत्वा ग्रामे ग्रामे दशदिवसीयसंस्कृतवर्गान् सञ्चाल्य संस्कृतभाषां पुनः जनभाषां विधातुं निरताः भवेयुः।

कार्यक्रमस्य सञ्चालनं संस्कृतभारत्याः जनपदप्रमुखः डा. निरञ्जनमिश्रः कृतवान्। धन्यवादज्ञापनं च वर्गसंयोजकः डॉ. प्रेमचन्द्रशास्त्री कृतवान्। कार्यक्रमे अनेके प्रतिभागिनः स्वानुभवान् श्रावितवन्तः यत् कथं ते संस्कृतं पठित्वा अपि संस्कृतेन सम्भाषणे असमर्थाः आसन् परन्तु अत्र आगत्य दशदिवसेषु एव संस्कृतेन सम्भाषणे समर्थाः सञ्जाताः। एतस्मिन् अवसरे प्रान्तकोषाध्यक्षः सुदर्शन - मल्होत्रा नगरस्य अनेके प्रतिष्ठिताः जनाः अपि उपस्थिताः आसन्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धापूर्वकं समायोजितं गुरुपूर्णिमा-पर्व

हरिद्वारम्। गायत्रीतीर्थे शान्तिकुञ्जे गुरुपूर्णिमायाः पर्व हर्षोल्लासपूर्वकम् आयोजितम्, यत्र सहस्रशः शिष्याः वैदिकविधिविधानेन पर्वपूजनं कृत्वा उपदिष्टानि सूत्राणि जीवने आचरितुं सङ्कल्पबद्धाः अभूवन्। शान्तिकुञ्जस्य मुख्यसभागारे देशविदेशतः समागतान् सहस्रशः शिष्यान् सम्बोधयन्ती संस्थाप्रमुखा शैलभगिनी गुरुपूर्णिमा-पर्व अनुशासनपर्व उक्तवती।

सा उक्तवती यत् श्रेष्ठगुरोः कृपया संरक्षणेन च जनाः श्रद्धाभावनया महान्तः भवन्ति। गुरुं प्रति सत्यनिष्ठया एव एकलव्यः मृत्तिकानिर्मितेन द्रोणाचार्येण तां विद्यां प्राप्तवान्, यया कृते अन्ये वर्षाणि यापयन्ति। स्वामी विवेकानन्दः, महर्षिः दयानन्दः, मीरा, अर्जुनादयः श्रेष्ठशिष्याणाम् उदाहरणानि सन्ति।

सा उक्तवती यत् गायत्रीपरिवारस्य संस्थापकः पं. श्रीरामशर्मा आत्मानं हिमालयस्थाय गुरवे स्वामिने सर्वेश्वरानन्दाय तथैव समर्पयामास यथा नरेन्द्रदत्तः स्वामिने रामकृष्णपरमहंसाय समर्पयामास।

अस्मिन् अवसरे शान्तिकुञ्जप्रमुखः डॉ. प्रणवपण्ड्या उक्तवान् यत् गुरोः वचनम् अङ्गीकृत्य पूज्यः आचार्यवर्यः 'करिष्ये वचनं तव' इति कथयन् सम्पूर्णश्रद्धया निष्ठया च २४ वर्षाणियावत्। कठिनां तपश्चर्यां कृतवान्। अद्य तस्यैव तपसः फलम् अस्ति यत् गायत्रीपरिवारः कोटिषु परिजनेषु विस्तृतः सञ्जातः। समाजोत्थानकार्ये च स्वमहत्त्वपूर्णं दायित्त्वं निर्वहति।

डॉ. पण्ड्या उक्तवान् यत् आगामिनिषु दिनेषु ५०० वक्तारः देशस्य कोणे कोणे, १०० वक्तारः विदेशेषु गुरुसत्तायाः विचारान् प्रसाराय सिद्धाः भवन्ति। देवसंस्कृतिविश्वविद्यालय योग-पाठ्यक्रमं चर्चयन् सः उक्तवान् यत् प्रायः द्वयोः द्वयोः योगप्रशिक्षकाणां शतं दलानि शीघ्रम् एव सम्पूर्णे देशे योगेन चिकित्सां प्रशिक्षणं च प्रदातुं प्रस्थास्यन्ति। सः उक्तवान् यत् वैज्ञानिकस्य अध्यात्मवादस्य प्रतिपादनाय ब्रह्मवर्चस्-शोधसंस्थानस्य वैज्ञानिकानां दलद्वयं शीघ्रमेव प्रस्थास्यति। एतद् दलं देशस्य प्रमुखेषु ७१ स्थानेषु कार्यक्रमान् आयोजयिष्यति। कार्यक्रमस्य सञ्चालनं श्यामबिहारी दुबे कृतवान्। श्रीवीरेश्वरद्विवेदी अपि अस्मिन् अवसरे उपस्थितान् सम्बोधितवान्। अस्मिन् अवसरे पुंसवन-नामकरण - अन्नप्राशन-संस्कारान् ब्रह्मवादिन्यः भगिन्यः अन्यान् संस्कारान् भ्रातरः सम्पादितवन्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'संस्कृतसाहित्यस्य विकासपरम्परा' इति विषये गोष्ठी सम्पन्ना

नवदेहली। दिल्ली-संस्कृत-अकादम्याः परिसरे 'संस्कृतसाहित्यस्य विकासपरम्परा' इति विषये दिल्लीसर्वकारस्य पूर्वशिक्षामन्त्रिणः कुलानन्द-भारतीयस्य अध्यक्षतायाम् एका गोष्ठी सम्पन्ना। गोष्ठ्यां मुख्यातिथिः आसीत् दिल्लीसर्वकारस्य स्वास्थ्यमन्त्री डॉ. योगानन्दशास्त्री। श्रोतॄन् सम्बोधयन् सः उक्तवान् यत् संस्कृतसाहित्यस्य विकासः अनेकयुगानाम् आत्ममन्थनम् अस्ति। वेदेभ्यः आरभ्य अनन्तरं रामायणकालं यावत् अनन्तरम् अपि देशस्य जनभाषा संस्कृतम् एव आसीत्। एषा शासकीया सांस्कृतिकभाषा अपि आसीत्। तात्कालिकाः लौहस्तम्भाः कलाश्च अस्याः भाषायाः विकासं द्योतयन्ति।

गोष्ठ्यां भाषमाणः अकादम्याः सचिवः डॉ. श्रीकृष्णसेमवालः उक्तवान् यत् संस्कृतसाहित्यस्य विकासे संस्कृतकाव्यगद्य-नाट्यकथासाहित्यस्य विशेषं योगदानम् अस्ति। अस्मिन् अवसरे डॉ. सत्यदेव चौधरी, डॉ. प्रवेश सक्सेना, डॉ. अमिता शर्मा, डॉ. रामकरण डवासः, डॉ. सुभाष वेदालङ्कारः च संस्कृतसाहित्यस्य विविधरूपेषु स्वान् शोधान् आश्रित्य विचारान् प्रकटितवन्तः। कार्यक्रमे डॉ. मोहनचन्द्राः, डॉ. ओमप्रकाशठाकुरादयः अनेके संस्कृतविद्वांसः समुपस्थिताः आसन्। ❋

चातुरी

- प्रो. अमरनाथः पाण्डेयः
एन १/३०, ए-९ नगवा
वाराणसी-२२१००५ (उ. प्र.)

(१)

चातुर्येण निजं हितं यदि कृतं नेयं हिता चातुरी,
कार्यैश्चाटुभिरर्जितं यदि धनं किं साध्यतेऽनल्पकम्।
उल्लासैर्वचसां सदांसि सुधियां सन्तर्पितान्यञ्जसा
पुण्या मङ्गलमूर्तिरार्यकलिता लोके परा चातुरी ।।

(२)

यैः खञ्जाः बधिरास्तथा च विकृताः सर्वात्मना सेविता,
म्लानाश्चीरभृतो विषण्णवदना आश्लिष्य सम्भूषिताः।
क्षुत्क्षामाः शिशवः स्त्रियश्च विधुरा वृद्धा रुदन्तोऽनिशं
प्रीत्यान्नादिभिरङ्ग साधु सुखितास्तेषां शुभा चातुरी ।।

(३)

विज्ञानेन निजेन येन महती सिद्धेः सृतिर्निर्मिता
लोकानां हितकाम्यया नवनवाविष्कारमालामयी।
व्यापारा विगतस्पृहेण विततां माधुर्यसन्दानिता-
स्तस्यार्च्यं भुवि जन्म कीर्तितगुणं बाभास्यते चातुरी ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कबीर - वाणी

- डा. निरञ्जनमिश्रः
साहित्यविभागे प्राध्यापकः
भगवानदाससंस्कृतमहाविद्यालयः, हरिद्वारम् (उत्तराञ्चलम्)

(१)

मञ्च-संस्थापनेनैव जल्पनेनैव वा सदा।
यदि भाषा-प्रचारः स्यात् तदा कुर्वन्तु वायसाः॥

(२)

वंशवादविरोधस्य कीदृशोऽयमनुक्रमः।
स्वयं पुत्रश्च पौत्रश्च स्थानापन्नो 'विधायकः'॥

(३)

जनानां पुरतो गत्वा लब्धया किं जयश्रिया ।
कारागारे स्थितो भूत्वा जयः स्याद्यदि तद्बलम् ॥

(४)

द्वयोरेकस्त्वदीयः स्यात् सर्वकारस्य शासनात् ।
स्वेच्छया चिनु रे पान्थ! विद्यां वा खलु 'नौकरीम्' ॥

(५)

वाञ्छन्तो मनसा नित्यं त्यजन्तो वचसा सदा ।
समुद्रान् तथैव पश्यामः श्रृगालो हरिणं यथा ॥

(६)

सर्प-मूषिकयोर्मैत्रीं द्रष्टुं वाञ्छा भवेद्यदि ।
ममाङ्गणं समायान्तु यत्र सिद्धो दिगम्बरः ॥

(७)

विद्यया पद-लाभः स्यात् विद्या-लाभः पदेन वा ।
गत्या भवति कालस्य कथमत्र विचारणा ॥

(८)

पङ्को वदति रे हंस ! वासं कुरु ममाङ्गणे ।
स्वच्छतायाः सुरक्षार्थं कटिबद्धस्तवास्म्यहम् ॥

(९)

एकामेव कुरु स्वाङ्के प्रेमस्थैर्यादि दृक्षया ।
उपदिशन्निव सर्वत्र नित्यं भ्रमति षट्पदः ॥

(१०)

अन्वयं कुरु हे विद्वन् ! शब्दशास्त्रविशारद ! ।
सप्तप्रासादशीर्षेऽस्ति 'महात्यागी महोदयः' ॥

(११)

राज्यलाभो भवेत् पूर्वं स्थितिरस्त्विति सुदृढा ।
ततो देशविकासः स्यात् त्रिषु वाक्येषु नीतयः ॥

(१२)

रोगमूलं न जानाति करोति मार्जनं सदा ।
जनास्तमेव जानन्ति 'वैद्यविद्याविशारदः' ॥

(१३)

दर्पण ! त्वं स्वभावस्य मार्जनं कुरु सत्वरम् ।
स्वरूपं वीक्ष्य लोकेऽस्मिन् हंसो हि वानरायते ॥

* * *

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

BHARATODAYA
R.N.I. Regd. No. UPBIL/1998/1485

भारतवर्षदेशम्

- श्रीनाथधरद्विवेदी
द्वारा साप्ताहिकं गाण्डीवम्
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी-२२१००२ (उ.प्र.)

(१)

सर्वेषु देशेषु य आर्यदेशो,
महामुनीनामपि माननीयः ।
सुरासुराणामभिलाषभूमिः,
स मानवानामपि कर्मभूमिः ।।

(२)

श्रीराम-चारित्र्य-पवित्रभूमिः,
सानन्द-गोविन्द-विहारभूमिः ।
शिवप्रतापादिक-वीरभूमिः,
जगत्यसौ भारत-पुण्यभूमिः ।।

(३)

इच्छन्ति देवा अपि जन्म यस्मिन्,
मुक्तिप्रदे बन्धनमुक्तिकामाः ।
सहस्रधा पुण्यतमप्रदेशं,
वन्दामहे भारतवर्ष-देशम् ।।

(४)

यदुत्तरस्यामचलाधिराजो,
यद्दक्षिणस्यां सलिलाधिराजः ।
गर्जन्ति यत्राऽपि मृगाधिराजाः,
वृहन्ति वा मत्तगजाधिराजाः ।।

(५)

वसन्तक-ग्रीष्म-घनागमानां
तथा शरद्-हैमक-शैशिराणाम् ।
षण्णामृतूनां परिवर्तनानि
नृणां वितन्वन्ति हृदि प्रमोदम् ।।

(६)

कलिन्दकन्या-मुनि जन्हुकन्या,
गोदावरी-गण्डक-नर्मदाभिः ।
पूताम्बुतीर्थाभिरहो नदीभिः,
पवित्रितो भारत देश एषः ।।

(७)

पुँस्कोकिलानामिह कूजितानि,
मधुव्रतानां कलगुञ्जितानि ।
केकानिनादाश्च शिखावलानां
मनांसि केषां न हरन्ति पुंसाम् ।।

....शेषांशः २ये पृष्ठे

हरिद्वारस्थित्या ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः (संस्कृत-मासिकम्)
P.O. गुरुकुलमहाविद्यालयः २४९४०७
हरिद्वारम् (उत्तराञ्चलम्)
सेवायाम्, श्री

मुद्रकेण, प्रकाशकेन डॉ. हरिगोपालशास्त्रिणा ज्वालापुरीये 'अनुभव प्रिंटिंग प्रेस' मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं पत्रं प्राकाश्यं नीतं हरिद्वारस्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालयसभया।
सम्पादकः डा. हरिगोपालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu